घोराणामाहवानां लिखितमिव जयं श्लाध्यमाविर्दधानो ।
वक्षस्युद्दामशस्त्रव्रण कठिनकिण ग्रन्थि लेखाच्छलेन ॥३॥
श्रीजीवितगुप्तोऽभूत्क्षितीश चूडामणि· सुतस्य ।
योद्दप्तवैरिनारी मुख नलिन वनै कशिशिरकरः ॥४॥
मुक्तामुक्तपयः प्रवाहशिशिरा सूत्तुङ्गतालीवन—
भ्राम्यद्दन्ति करावलून कदली काण्डासु वेलास्वपि ॥
श्च्योतत्स्फारतुषारनिर्झरपयः शीतेऽपिशैले स्थिता—
न्यस्योच्चैर्द्विषतो मुमोच न महाघोरः प्रतापज्वरः॥५॥
यस्यातिमानुषं कर्म दृश्यते विस्मयाज्जनौघेन ।
अद्यापि कोशवर्धनतटात्पलुतं पवनजस्येव ॥६॥

प्रख्यात शक्तिमाजिषु पुरःसरं श्रीकुमारगुप्तमिति ।
अजनयदनेकं रा नृपो हर इव शिखिवाहनं तनयम् ॥७॥
उत्सर्पद्वातहेला चलितकदलिकावीचिमाला वितानः ।
प्रोद्यद् धूली जलौघभ्रमितगुरु महामत्त मातङ्ग शैलः ॥
भीमः श्रीशानवर्म क्षितिपतिशशिनः सैन्य दुग्धोद सिन्धु—
लक्ष्मीसंप्राप्तिहेतुः सपदि विमथितो मन्दरीभूय येन ॥८॥
शौर्यसत्यव्रतधरो यः प्रयाग गतो धने ।
अम्भसीव करीषाग्नौ मग्नः स पुष्पपूजितः ॥९॥
श्री दामोदर गुप्तोऽभूत्त नयः तस्य भपतेः ।
येन दमोदरेणैव दैत्या इव हाता द्विपः ॥१०॥
यो मौखरेः समितिषूद्धतहूणसैन्य—
वलगत्घटा विघट यन्नुरुवारणानाम् ॥
सम्मूर्च्छितः सुरबधुर्वरयन्ममेति ।
तत्पानि पंकज सुख स्पर्शाद्विबुद्धः ॥११॥
गुणवद्द्विज कन्यानां नानालङ्कार यौवन वतीनाम् ।
परिणायितवान्स नृपः शतं निसृष्टा ग्रहाराणाम् ॥१२॥
श्रीमहासेनगुप्तोऽभूत्तस्माद्वीराग्रणीः सुतः ।
सर्ववीर समाजेषु लेभे यो धुरि वीरताम् ॥१३॥
श्रीमत्सुस्थितवर्मयुद्धविजयश्लाघापदाङ्कं मुहुः ।
यस्याद्यापि विबुद्धकुन्दकुमुदच्छुरणाच्छहारतम् ॥
लौहित्यस्यतटेषु शीतलतलेपूत्फुल्लनागद्रुम-
च्छायासुप्त विबुद्ध सिद्धमिथुनैः स्फीतं यशो गीयते ॥१४॥

वसुदेवादिव तस्माच्छ्री सेवनशोभित चरण युगः ।
श्रीमाधव गुप्तोऽभुन्माधव इव विक्रमैकरसः ॥१५॥
....नुस्मृतो धुरि रणे श्लाघावतामग्रणीः ।
सौजन्यस्य निधानमर्थनिचयत्यागोद्धुराणां वरः ।
लक्ष्मीसत्यसरस्वतीकुलगृहं धर्मस्य सेतुर्दृ ण · ॥
पूज्यो ? नास्ति स भूतले ....सद्गुणैः ॥१६॥
चक्रं पाणितलेन सोऽ'युदवहत्तस्या।पि शाङ्गं धनुः ।
नाशायासुहृदां सुखाय सुहृदां तस्याप्यसिर्नन्दकः ॥
प्राप्ते विद्विषतां वधे प्रतिहत् तेनाप ..... . ।
... . न्या प्रणोमुर्जनाः॥१७॥
... .
आजौ मया विनिहिता बलिनो द्विपन्त : ।
कृत्यं न मे ऽसत्य परमित्यवधार्य वीरः ॥
श्री हष देव निज सङ्गमवाञ्छया च ।
... ... ॥ १८ ॥
श्री मान्बभूव दलितारिकरीन्द्रकुम्भ
मुक्तारजः पटलपांसुमण्डलाग्रः ॥
आदित्यसेन इति तत्तनयः क्षितीशः ।
चूड़ामणिर्द ... ॥ १६ ॥
· ...मागत मरिध्वंसोत्थमाप्तं यशः ।
श्लाघं सर्वधनुष्मतां पुर इति श्लाघां परां बिभ्रति ॥
आशावांद परम्पराचिरसकृद्...... ...... ।
... यामास ॥ २० ॥

आजौ स्वेदच्छलेन ध्वजपटशिखया मार्जतो दानपङ्कं ।
खड्गं क्षुराग्रेन मुक्ता शकल सिकति...... ॥
....
मत्तमातङ्ग घातं ।
तद्गन्धा कृष्ट सर्पद्वहल परिमल भ्रांत मत्तालि जालम् ॥ २१ ॥
आबद्ध भीम विकट भ्रुकुटी कठोर
—सङ्ग्राम... .. .
. वल्लभभृत्यवर्ग—
गोष्ठीषु पेशलतया परिहासशीलः ॥ २२ ॥
सत्यभर्तृव्रता यस्य मुखोपधानतापसी
परिहास.... ॥ २३ ॥
.... . ज्ञः सकलरिपुबलध्वंसहेतुर्गरीया
न्निस्त्रिं शोत्खातधात श्रमजनितजडोऽप्यूर्जितत स्वप्रतापः ।
युद्धे मत्तेभ कुम्भ स्थल ......
श्वेतातपत्र स्थगित वसुमती मण्डलो लोकपालः ॥ २४ ॥
आजौ मत्तगजेन्द्र कुम्भ दलन स्फीत स्फुरद्दोर्युगो
ध्वस्तानेक रिपुप्रभाव...... . यशोमण्डलः ।
न्यस्ता शेष नरेन्द्रमौली चरणस्फार प्रतापानलो
लक्ष्मीवान्समराभिमानविमल प्रख्यातकीर्तिनृपः ॥ २५ ॥
येनेयं शरदिन्दु बिम्बधवला प्रख्यात भूमण्ला
लक्ष्मी सङ्गमकांक्षया सुमहती कीर्तिरिचरं कोपिना ।
याता सागर पारमद्भुततमा मापत्न्यवैरादहो
तेनेदं भवनोत्तमं क्षितिभुजा विष्णोः कृते कारितम् ॥ २६ ॥

तज्जनन्या महादेव्या श्रीमत्या कारितो मठः ।
धार्मिकेभ्यः स्वयंदत्तः सुरलोक गृहोपमः ॥ २७ ॥

शङ्खेन्दु स्फटिक प्रभा प्रतिसमस्फार स्फुरच्छीकरं
नक्रकान्तिचलत्तरङ्ग विलसत्पक्षिप्र नृत्यत्तिमि ।
राज्ञा खानितमद्भुतं सुपयसा पेपीयमानं जनै-
स्तस्यैव प्रियभार्यया नरपतेः श्रीकोणदेव्या सरः ॥ २८ ॥

यावच्चन्द्रकला हरस्य शिरसि श्रीः शार्ङ्गिणो वक्षसि
ब्रह्मास्ये च सरस्वती कृत ···· ।
भोगे भूर्भुजगाधिपस्य च तडिद्यावद् घनस्योदरे
तावत्कीर्तिमिहातनोति धवलामादित्य सेनो नृपः ॥ २९ ॥

सूक्ष्म शिवेन गौडेन प्रशस्तिर्विकटाक्षरा
.. .. मिता सम्यग धार्मिकेण सुधीमता ॥ ३० ॥

(b) Shahpur Stone image inscription of Adityasena

Line 1 ····ख । ट ज ··चन्द्रक्षितिकालं यावत् प्रतिपादितम् ॥
,, 2 ॐ सम्वत् ६० ६ मार्ग शुदि ७ (?) अस्यान दिवसमास सम्वत्सरानुपूर्व्यांम् श्री आदित्यसेन
,, 3 (दैव) राज् (य) े ना (?) लन्द (?) महाग्रहारे साधुना व व (ब) लाधिकृत मालपक्षेण दै (य) धर्म्मोयम् प्रतिष्ठितम् (ह)
,, 4 (माता पितरोरा) तमनश्च पुण्याभि वृद्धये ॥

(c) Mandar Hill rock inscription of Adityasena

Line 1 ॐ परम भट्टारक महाराजाधिराज

" 2 श्री आदित्यसेन देव दयिता परम

" 3 भट्टारिका राज्ञी महादेवी श्री कोनादेवी

" 4 पुष्करिणी कीर्ति मिमाण कारितवती ।

(d) Mandar Hill rock inscription of Adityasena

Line 1 ॐ परमभट्टारक महाराजाधिराज श्री आदित्यसेन देव दयिता

" 2 परमभट्टारिका राज्ञी महादेवी श्री कोण देवी पुष्करिणी कीर्तिमिमानं कारितवनी

Note.—Recently another short inscription of a later Gupta king has been discovered by Dr. D. C. Sircar and this proves the extension of later Gupta rule in Chotanagpur area.

(e) Deo-Barnak inscription of Jivitagupta II
(C. 8th Century A.D.)

नमः स्वस्ति शक्ति त्रयो पात्त जय शब्देन महानौहास्त्यश्वपत्ति सम्भारदुर्निवाराज्जय स्कन्धावारात गोमति कोट्टकसमीप वासकं, ...श्री माधवगुप्तः तस्य पुत्रः तत्पादानुध्यातो परम भट्टारिकायां राज्ञां महादेव्यां श्री मत्यामुत्पन्नः परम भागवत श्री आदित्यसेन देव तस्य पुत्रः तत्पादानुध्यातो परम भट्टारिकायां राज्ञां महादेव्यां श्री कोणदेव्यामुत्पन्नः परम माहेश्वर परम भट्टारक महाराजाधिराज परमेश्वर श्री देवगुप्तदेवः तस्य पुत्रः तत्पादानुध्यातो परम भट्टारिकायां राज्ञां महादेव्यां श्री कमलादेव्यां उत्पन्नः परम माहेश्वर परम भट्टारक महाराजाधिराज

परमेश्वर श्री विष्णुगुप्तदेवः तस्य पुत्रः तत्पादानुध्यातो परम भट्टारिकायां राज्ञां महादेव्यां श्री इज्जादेव्यामुत्पन्नः परम ....परम भट्टारक महाराजाधिराज परमेश्वर श्री जीवितगुप्तदेव कुशली नगर भुक्तौ वालवी विषयैक श्रीवा '/ वो पद्रलिक (त्वा) न्त शयाति वारुणिका ग्राम गोष्ठ नकुल तलवाटक दूत सीमा कर्मकमधा...... टक राज पुत्र राजामात्य महात्तटिक महादण्डनायक महा-प्रतिहार महा सा॰ प्रभातस ....कुमारामात्य राज स्थानीयो-परिक॰ ...धिक चौराधरणिक दाण्डिक दण्डपाशिक क...शणि वलव्यायत किशोर वाटक ग्राम......मणिकग ..पटिकर्म...... रसक .. ...तास्मत्पाद प्रसादोपजीविनः च प्रति वासिनस च ब्राह्मणो-त्तर महत्तरक कुन्तीपुर॰ विज्ञापति श्री वरुणवासि भट्टारक प्रतिबद्ध भोजक सूर्यमित्रेण उपरिलिखित... ग्रामाधि संयुक्त..... परमेश्वर श्री बालादित्यदेवेन स्वशासनेन भागव श्री वरुण वासि भट्टारक क ... ॰व परिवाटक ॰भोजक हंस मित्रस्य सभापतया यथा कलाध्यासिभिश्च एवं परमेश्वर श्री सर्ववर्मन ... भोजकं ऋषिमित्र ....॰ यतकं एवं परमेश्वर ..॰शासन दानेन भोजक दूर्गमित्रस्यानुमोदित .. तेन ...भुज्यते तदहं किमपि ... एवं मतिमान् ॰ अनुयामोदितमिति सर्व समज्ञापना ॰इता ..... पशु .... वरुणवास्या यतनं तदनुदत्तम त्यक्त सोद्रगं सोप-रिकरं सदासापराधपंच ..

---

9. The Pala Inscriptions

(a) [i] Bodhagaya Inscription of Dharmapala (Year 26)

1 चम्पे शायतनेरम्ये उज्ज्वलस्य शिलभिदः । के—
2 शवाख्येन पुत्रेण महादेवश्चतुर्म्मुखः ॥ १ ॥ श्रेष्ठाना—
3 मेव मल्लानां महाबोधि निवासिनां । स्नातक—
4 म्प्रजयास्तु श्रेयसे प्रतिष्ठापितः । २ ॥ पुष्करि—
५ ण्यत्यगाधा चपूता विष्णुपदीसमा । त्रितये—
5 न सहस्रेण द्रम्माणां खानिता सतां ॥ ३ ॥
7 षडविंशतितमे वर्षे धर्म्मपाले महीभुजि ।
8 भाद्रवहुलपञ्चम्यां सूनोर्भास्क—
9 रस्याहनि ॥ ४ ॥

(a) [ii] Nalanda Copperplate of Dharmapala

1 ओं स्वस्ति । महानौहस्त्यश्वरथपत्तिसम्पत्त्युपात्त जयशब्दा-
2 त कपिला (?) वासकात श्रीमज्जयस्कन्धावारात । परम—
3 सौगतो महाराजाधिराज श्री गोपालदेव पादानुध्या—
4 तः । परमेश्वरः परमभट्टारको महाराजाधिराजः श्री
5 मान धर्म्मपालदेवः कुशली । नगरभुक्तौ । गया विष—
6 यान्तपति जम्बूनादीवीथी प्रतिबध निगुहग्रामासन्न उ—
7 त्तरामग्रामके । समुपगतान सर्व्वानैव राजराजन—

8 का राजपुत्र राजामात्य महाकार्त्ताकृतिक महादण्डनाय—

9 क महाप्रतिहार महासामन्त महाराज दौः साधसाधनिक—

10 प्रमातृ सरभङ्ग कुमारामात्य राजस्थानीयोपरिक विषय—

11 पति दाशापराधिक चौरोद्धरणिक दाण्डिक दाण्डपाशिक चे—

12 त्रप प्रान्तपाल तदायुक्तक विनियुक्तक हस्त्यश्वोष्ट्र बल व्या—

13 प्रितक किशोर वड़वा गोमहिष्य अधिकृतदूत प्रैष-णिक गमा—

14 गमिकाभित्वरमाणक गौडमालव खशकुलिकहूणभट—

15 चट सेवक दिनन्याश्चार्कार्चितान स्वपादपद्मोपजीविनः प्र—

16 तिवासिनश्च ब्राह्मणोत्तरान महत्तर कुटुम्बिपुरोग मेदान्ध्र चण्डा—

17 ल पर्यन्तानमाज्ञापयत्यस्तुवः संविदित यथापरिलिखित उत्त—

18 राम ग्रामकः स्वसाम तृणयुतिगोचरपर्य्यन्तः सोपरिकरः

19 ···· ···स चौराद्धरणः सर्व्वपीड़ा परिहृत—

20 ········· चाट भट प्रवेशो किञ्चित प्रग्राम्यो राजभाव्य-सर्व्वप्र—

21 त्याय समेतो भूमिच्छिद्र न्यायेनाचन्द्रार्क क्षिति समकाला—

22 नः पूर्वं भुक्तक भुज्यमान देव ब्रह्मदेय वर्जितोमया

23 मातापित्रारात्मनश्च पुण्य यशाभिवृद्धये वन्द्याचार्य धर्म्म—

24 ······ भट्टारके आर्ये तारा भट्टारिका—

Second Side

1 ·.... ·प्रतिवासिभिश्चाज्ञा श्रवण वि—
2 धेयेर्भूत्वा समुचित देय भाग भोग कर हिरण्यदि
3 ....
4 ......
5 ·.. ..महासेनापति श्री ·······················दत्त ··
6 ····लिखितमिदम् शासनम् महाक्षपटलिक
7 ···· कुलदत्तेन धर्मदत्तपुत्रेणेति ··
8 ·····चतुः षष्टिक दत्तिः······
9 ···प्रतिपादिता···
10 ······तथा · तस्यमुलं चतुः षष्टिकः······
11 कांसकारस्य······
12 ····उत्कीर्णम् सूत्रधार······

(a) [iii] The Valgudar inscription of Dharmapala

1 सिद्धम् ।। श्री धर्मपालदेवराज्ये क्रिमिलाधिष्ठाने मधुश्रेणिकः
2 सालो धर्म्मपत्न्य भूकेन देवधर्म्मायम् कारितः ।।

(b) [i] Kurkihar Image Inscription of Devapal (Year 9)

१ स्वस्ति श्री देवपालदेवराज्ये सम्वत ९ वाहिखने सद्ध्मा—
2 मवास्तव्य ग्रामलक प्रधान सिद्धमकपत्नी असुकेन मल्लक—
3 च्छन्दकम् मल्लपोरस्य प्रतिपादितः ।

(b) [ii] Hilsa Image Inscription of Devapal (Year 25)

First Inscription—i) ओं ओं तारे ओं तारे ओं तारे
ii) स्वाहा ।

Second Inscription—Usual Buddhist Legend ये धर्म्महेतु······etc.

Third Inscription—1 ओं सम्वत् ३५ (or 25 ?) श्रीदेवपाल देव विजय राज्ये श्री नालन्दामहा वैहारी कस्थ-वहुश्रुत श्री मञ्जुश्रीदेवः सकक पर—

2 मोपासक गङ्गाधरस्य देयधर्म्मोयं यदत्रैपुण्यतद् भवतु आचार्यमातापितॄं पूर्व्वाङ्गमंकृत्वा सकलस—

3 त्तराषे अनुतरज्ञानं व्याप्त इति ।

(b) [iii] Monghyr Copperplate of Devapal (Year 33)

(First Side)

Line 1 ॐ स्वस्ति । सिद्धार्थस्य परार्थसुस्थिर

,, 2 मतेः सन्मार्गमभ्यस्यस्सिद्धिसिद्धिम्

,, 3 अनुत्तरामभगवतस्तस्य प्रजासुक्रियात । यस्त्रैवातुक सत्व सिद्धि पद्वीरत्युग्र वीर्योदयाज् जित्वा निवृति—

,, 4 माससाद सुगतः सन्सर्व्वभूमिश्वरः ॥ (१) सौभाग्य-न्दधतुलं श्रियस्सपत्न्यात्न्या गोपालः पतिर्भवद्वसु—

,, 5 न्धरायाः। दृष्टान्ते सति कृतिनां सुराज्ञि यस्मिन
श्रद्धेयाः पृथु सगरादयोप्य अभुवन ॥ (२) विजित्य
जेना जलधेरवसुन्ध—

,, 6 रां विमोचितामोघ परिग्रहा इति। सत्राष्पमुद्राष्प
विलोचनान पुनर्व्वनेषुवन्धुन ददिशुर्म्मतंग जः ॥ (३) च

,, 7 लतस्वनन्तेषु बर्त्मेषु यस्य विस्वम्भराया निचितं
राजोभिः। पाद प्रचार क्षमसन्तरिक्ष विहंगमानाम्
सुचिरम् बभूव ॥(४)

,, 8 शास्त्रार्थभाजा चलतोनुशास्य वर्णान प्रतिष्ठापयता
स्वधर्म। श्री धर्मपालेन सुतेन सोभूत स्वर्गस्थिताना-
ममनृणः

,, 9 पितृनाम ॥ (५) अचलैरैव जंगमैरयदीयैर विच-
लद्भिर्द्विरदैः। कदर्थ्यमाना। निरुपप्लममम्बरम्
प्रपेदेश—

,, 10 रणाम् रेणुनिभेन भूत धात्री ॥ केदारे विधिनोपयुक्त-
पयसाम् गंगासमेताम्बुधौ गोकर्णादिषु चाप्यनु—

,, 11 स्थितत्वाम् तीर्थेषु धर्म्म्या क्रियाः।। भृत्यानाम् सुख
मेव यस्य सकलानुधृत्य दुष्टानिमान लोकानसा—

,, 12 धयातोनुषंग जनिता सिद्धिः परत्राप्यभूत ॥ (७)
तैस्तेर दिग्विजया वसान समये सम्प्रेषितानाम
परैः स—

,, 13 त्कारैरपनीय खेदमखिलं स्वां स्वान् गतानां भुवम्।
क्रियमभावय तां यदायमुचितम् प्रीत्या नृपाणामतभू सो

„ 14 त्कण्ठाम् हृदयम् दिवश्च्युतवतां जातिस्मराणामिव ॥
(८) श्री परबलस्य दुहितुः क्षितिपतिना राष्ट्रकूट
तिलकस्य ।

„ 15 रण्णाःदेव्याः पाणिर्जगृहे गृहमेधिना तेन ॥ (६)
धृन्नतु यियम् लक्ष्मीः साक्षातक्षितिनु शरीरिणी
किमवनि पतेः

„ 16 कीर्तिर्मुताथवा गृह देवता । इति विदधति शुच्याचा-
रावितर्कवतिः प्रजाः प्रकृति गुरुभीर्य्या शुद्धान्तमं
गुणौ—

„ 17 रकरोदधः ॥ (१०) श्लाघ्या पतिव्रतासौ मुक्तारत्नम्
समुद्र शु क्तरिव श्री देवपालदेवम् प्रसन्नवृत्तम् सुतभ-
सुत ॥ (११)

„ 18 निर्म्मलो मनसि वाचि सम्यतः कायकर्म्मणि च यः
स्थितः सुचौ राज्यमाप निरुप्प्लवम् पितुर्बो-
धिसत्वइव

„ 19 सौगतम् पदम् ॥ (१२) भ्राम्यर्द्धिविजयक्रमेण
करिथिस्तामेव विन्ध्यातविमुद्दाम्मप्लव मान वाष्पपय-
सो दृष्टाः पूर्नन्बान्ध—

„ 20 वः । कम्बोजेषु च यस्य वाजीयुवभिर्ध्वस्तान्यराजौज-
सौ हेषातिमिश्रितहारि हेषितरवाः कान्ताश्चिरम्
वीक्षिताः ॥ (१३) दक्षिण भुज इव राज्ञः परबलदलने
सहाय निरपेक्षः ।

„ 21 यः पूर्वम् वलिना कृतः कृतयुगे येनागभदमार्गवस्त्रेता-

याम् प्रहृतः प्रिय प्रणयिना कर्ण्णेन यौ द्वापरे ।
वि‌च्छिन्नः कलि

,, 22 ना शकद्विषि गते कालेन लोकान्तरम् येन त्यागपथः
स एवहि पुनविस्पष्टमुन्मिलितः ॥ (१४) आ गंगागम
महिता—

,, 23 त्सपत्नशून्यामासेतु प्रथितदशास्य केतुकीर्तेः । उर्व्वीमा
वरुनिकेतनाच्च सिन्धोरा लक्ष्मीकुल भवनाच्चयो

,, 24 बुभोज ॥ (१५)स खलु भागीरथी पथ प्रवर्तमान-
नानाविधिनौवाटक सम्पादित सेतुबन्ध निहित शैल
शिखर श्रे

,, 25 णी विभ्रमानिरतिशय घन घनाघन घटा श्यामायमा
न वासर लक्ष्मी समारब्ध सन्तत जलद समय स—

,, 26 न्देहात । उदीचीनानेकनरपति प्राभ्रितीकृताप्रमेय हय-
वाहिनी खर खुरोत्खातधूलीधूसरितदि—

,, 27 गन्तरालात । परमेश्वर सेवा समायाताशेष जम्बूद्वी-
पभूपाल पादात भरनमदावनेः । श्री मुद्गगिरिसमावा-

,, 28 सित श्रीमज्जयस्कन्धावारात परमसौगत परमेश्वर
परम भट्टारक महाराजाधिराज श्री धर्मपाल देव—

, 29 पादानुध्यातः परमसौगतः परमेश्वर परमभट्टारकोमहा-
राजाधिराजः श्रीमान् देवपालदेवः कुशली ।

,, 30 श्रीनगर भुक्तौ क्रिमिला विषयान्तः पातिस्वसम्बद्धावि-
च्छिन्न तलोपेत मेषिक ग्रामे समुपगता—

,, 31 न सर्व्वानेव राणक । राजपुत्र । अमात्य । महाका-

शौक्तिक । महादण्डनायक । महासा

„ 32 मन्त । महादौह्माधसाधनिक । महाकुमारामात्य । प्रमातृ । सरभंग । राजस्थानीय । उपरिक । दाशा

„ 33 पराधिक । चौरोद्धरणिक । दाण्डिकदाण्डपाशिक । शौल्किक । गौल्मिक । चत्रप (क्षेत्रप) । प्रान्तपाल । कोट्टपाल ।

„ 34 खण्डरक्ष । तदायुक्तक । विनियुक्त । हस्त्यश्वोष्ट्र बलव्य पृतक । किशोरवड़वागौमहिष्यजाविका-

ध्यक्ष. दूतप्रैषणी

„ 36 क । गामागमिक । अभित्वरमान. विषयपति । नरपति. ता रक । गौरमालवखश हून कुलिक कर्णाट लाट चाट भट

„ 36 सेवकादीन अन्याश्चाकीर्तितान स्वपादपद्मोपजीविनः प्रतिवासिनश्च ब्राह्मणोत्तरान महत्तर कुटुम्बि पुरोगमेदा

(Second Side)

„ 37 न्ध्रक चण्डाल पर्यन्तयन सामाज्ञापयति विदितम

„ 38 स्तु भवतां यथापरिलिखित मेषिकग्रामः स्वसी

„ 39 मातृण यूतिगोचर पर्यन्तटः मतलः सोपेरिकरः सौदशा

„ 40 पराध स चौरोद्धरणः परिहृतसर्व्व पोड़ः । अचाट भट प्रवेशो किञ्चितप्रग्राह्यो राजकुलीयप्रत्यायसमे

„ 41 तो भूमिच्छिद्र न्यायेनाचन्द्र क्षितिसमकालः पूर्वदत्तभुक्त भुज्यमान- देवब्रह्मदेय वर्ज्जितोमया मातापित्रोरात्मनश्चपु

,, 42 एष्वयशोभिवृद्धये वेदार्थविदो यज्वानौ विश्वरातस्य
पौत्रायविद्यावदात चेतसो भट्टश्रीबाराहुरातस्यपुत्राय ।

,, 43 पदवाक्यप्रमाणविद्यापारगताय । औपमन्यवसगोत्राय ।
आशलायनसब्रह्मचारिणे । भट्टप्रवरविहेकरातमिश्राय

,, 44 शासनीकृत्य प्रतिपादितः । यतोभवद्भिः सर्व्वैरेव
भूमेरदानफल गौरवादपहरणे महानरकपातभयाच्छ-
दानमि—

,, 45 दमनुमोदय पालनोयम् प्रतिवासिभिः क्षेत्रकरैश्चाज्ञा
श्रवण विधेयैर्भूत्वा समुचितकरहिरण्यादिसर्व
प्रत्यायोपन—

,, 46 य. कार्य इति । सम्वत् ३३ मार्ग दिने २१ । तथा
च धर्मानुशासन श्लोकाः । सर्व्वानेतान भाविनः पार्थि-
वेन्द्रान (भूयोभूयः) प्रार्थयत्येष

,, 47 रामः । सामान्याय धर्मसेतु नृपाणां काले पालनीयः
क्रमेणः ॥ (१६) बहुभिरवसुधा

,, 48 दत्ता राजभिः सगरादिभिः । यस्ययस्ययदा भूमिस्तस्य
तस्यतदा फलम् ॥ (१७) स्वदत्ताम् परदत्ताम् वा यौ
हारेत वसु—

,, 49 न्धराम् । स विष्ठायाम् क्रिमिभूत्वा पितृभिस्सह
पच्यते ॥ (१८)

इतिकमलदलाम्वुलोलम् श्रीयमनुचिन्त्य मनुष्य

,, 50 जीविताञ्च । सकलमिदमुदाहृताञ्चवुद्धवान हि
पुरुषैः परकीर्तयो विलोप्याः ॥ (१९) श्रेयोविधावु-

भयांसवि—

,, 51 शुद्धिभाजम् राजात्करोदधिगतात्मगुणाम् गुणज्ञः । आ-
त्मानुरूप चरितम् स्थिर यौवराज्यम् श्री राज्यपालामि

,, 52 ह दूतकमात्मपुत्रम् ॥ (२०)

(b) [iv] The Nalanda Copperplate of Devapaldeva (Year 39)

Line 1 ओं स्वस्ति । सिद्धार्थस्य परार्थसुस्थित मतेस्सन्मार्ग-
मभ्यस्यत

,, 2 स्सिद्धिस्सिद्धिमनुत्तरां भगवतस्तस्य प्रजासु क्रिया

,, 3 त् । यस्त्रैधातुकसत्वसिद्धि पदवीरत्युग्र वीर्योदया
ज्जित्वा

,, 4 निर्वृतिमाससाद सुगतस्सर्वार्थभूमीश्वरः ॥ (१)
सौभाग्यन्दध

,, 5 दतुलं श्रियस्सपत्न्या गोपालः पतिरभवद्वसुन्धरायाः ।

,, 6 दृष्टान्ते सति कृतिनां सुराज्ञि यस्मिन् श्रद्धेयाः
पृथुसगरादयोप्यभूवन् ॥ (२) विजित्य येना
जलधेर्वसुन्धराम्विमोचिता

,, 7 मोघपरिग्रहा इति । सबाष्पमुद्बाष्पविलोचनान्पुनर्वनेषु
बन्धून्ददृशुर्म्मतङ्गजाः ॥ (३) चलत्स्वनन्तेषु बलेषु
यस्य विश्वम्भरा—

,, 8 या निचित रजोभिः ॥ पादप्रचारक्षममन्तिरक्षम्विहङ्ग
मानां सुचिरम्बभूव ॥ (४) शास्त्रार्थभाजा चलतोनु-
शास्य वर्णाप्रतिष्ठापय

„ 9 ता स्वधर्मेश्री धर्मपालेन सुतेन सोभूत्स्वर्गस्थिताना-
मनृणः पितृणाम् ॥ (५) अचलैरिव जङ्गमैर्यदीयैर्वि
चलद्भि- द्विरदैः कदर्श्यमाना ।

„ 10 निरुपप्लवमम्बरं प्रपेदे शरणं रेणुनिभेन भूतधात्री ॥
(६) केदारेविधिनोप युक्त पयसां गगासमेतेम्बुधौ ।
गोकर्णादिषुचाप्यनुष्ठ—

„ 11 तवतान्तीर्थेषु धर्म्याः क्रियाः । भृत्यानां सुखयेव यस्य
सकलानुद्धृत्य दुष्टानिमान्लोकान्साधयतोऽनुषङ्ग
जनितासिद्धिः परत्रा—

„ 12 प्यभूत् ॥ (७) तैस्तैर्दिग्विजयावसान समये
संप्रेषितानां परैः सत्कारैरपनीय खेदमखिलं स्वांस्वां
गतानांभुवम् । कृत्य भावयतां

„ 13 यदीयमुचितं प्रीत्यानृपाणामभूत् सोत्कण्ठ हृदयं
दिवश्च्युतवतां जातिस्मराणामिव (८) ॥ श्री परबलस्य
दुहितुः क्षितिपतिनारा—

„ 14 ष्टकूटतिलकस्य । रण्णादेव्याः पाणिर्जगृहे गृहमेधिना
तेन ॥ (९) धृततनुरियं लक्ष्मीः साक्षात्क्षितिर्नु
शरीरिणी । किमवनि पनेः कीर्तिर्मूर्

„ 15 र्तायवा गृहदेवता । इति विदधतो शुच्या चारा
वितर्कवतीः प्रजाः प्रकृतिगुरुभिर्या शुद्धान्तङ्गुणैरकरो-
दधः ॥ (१०) श्लाघ्या पतिव्रता सौ सु

„ 16 क्तारत्नं समुद्र शक्तिरिव श्री देवपालदेवम्प्रसन्नवक्त्रं
सुतमसूत ॥ (११) निर्म्मलो मनसि वाचि संयतः ॥

कायकर्म्मणिच यः स्थितः शुचौ ।

,, 17 राज्यमाप निरुपप्लवम्पितुर्बोधसत्व इव सौगतं पदम् (१२) भ्राम्यद्भिर्विजय क्रमेण । करिभिस्तामेव विन्ध्याटवीमुद्दामप्लवमानवाष्पपय

,, 18 सोद्दृष्टाः पुनर्बन्धवः ! कम्बोजेषु च यस्य वाजियुभिर्ध्वंतान्य राजौजसो हेषामिश्रितहारिहेषितखाः कान्ता श्चिरम्वीक्षिताः ॥ (१३) यः पूर्वं बलि

,, 19 ना कृतः कृतयुगे येनागमद्भार्गवस्त्रेतायां प्रहृतः प्रियप्रणयिना कर्णेन यो द्वापरे । विच्छिन्नः कलिना शकद्विषि गते कालेन लोकान्त

,, 20 रम्येनत्यागपथस्स एवहि पुनर्विस्पष्ट मुन्मीलितः ॥ (१४) आ गंगागमहितात्सपत्नशून्यामासेतोः प्रथित-दशास्यकेतुकीर्तिः । उर्व्वीमावरुण

,, 21 निकेतनाच्च सिन्धोरा लक्ष्मीकुलभवनाच्च योबुभोज ॥ (१५) स खलु भागीरथी पथप्रवर्त्तमाननाना विधनौ-वाटक संपादित सेतुबन्धनिहित शै

,, 22 ल शिखर श्रेणि विभ्रमात् निरतिशय घनघनाघन घटाश्यामायमान वासर लक्ष्मी समारब्ध संततजलद समयसन्देहात् उदीचीनानेक

,, 23 नरपतिप्राभृतीकृताप्रमेयहयवाहिनी खरखुरोत्खात-धूलीधूसरित दिगन्तरालात् परमेश्वर सेवा समायाता शेष जंबूद्वी

,, 24 पभूपाल पादात भरनमदवनेः श्री मुद्गिरिसमावासि

श्री मञ्जयस्कन्धावारात् परम सौगत परमेश्वर भट्टारकम

„ 25 महाराजाधिराज श्री धर्मपालदेव पादानुध्यातः परमसौगतः परमेश्वरः परमभट्टारको महाराजाधिराजः श्री मान्देवपा—

„ 26 लदेवः कुशली। श्रीनगरभुक्तौ राजगृह विषयान्तः पाति अजयपुरनय प्रतिबधद्धस्वसम्बद्धा विच्छिन्नतलोपेत। नन्दिवनाक। मणि

„ 27 वाटक। पिलिपिण्कानप्रतिबनटिका। अचलानयप्रतिवद्ध हस्तिग्र म। गया विषयान्तः पातिकुसुदसूत्रवीथी प्रतिबद्धपालाम

„ 28 कग्रामेषु। समुपमगतान सर्व्वानेव राजराणक। राजपुत्र। राजा-मात्य। महाकार्त्ताकृतिक। महादण्डनायक। महाप्रतीहार। महा

„ 29 सामन्त। महादौः साधसाधनिक। महाकुमारामात्य। प्रमातृ। शरभङ्ग। राजस्थानो। योपरिक। विषयपति। दाशापराधिक। चौरोद्धर

„ 30 णिक। दाण्डिक। दाण्डपाशिक। शौल्किक. गौल्मिक। क्षेत्रपाल। कोटपाल। खण्डरक्ष। तदायुक्तक। विनियुक्तक। हस्त्यश्वोष्ट्रनौबलव्यापृ

„ 31 तक। किशोरवडवागोमहिष्यधिकृत। दूतप्रैषणिक। गमागमिक। अभित्वरमाणक. तरिक। तरपतिक। औड्रमालवखशकुलिक।

„ 32 कर्णाट हूण ।
चाटभटसवकादीनन्यांश्चाकीर्तितान् स्वपादपद्मो-
पजीविनः प्रतिबासिनश्च ब्राह्मणोत्तरान् महत्तमकुटु-
म्बिपुरोगमेदान्ध्र

„ 33 क । चण्डाल पर्यन्तान् समाज्ञापयति विदितमस्तु-
भवताम् यथोपरिलिखितस्वसम्बद्धाविच्छिन्नतलोपेत
नन्दिवनाकग्राम । मणिवाट

„ 34 कग्राम । हस्तिग्राम । पालामकग्रामः स्वसीमातृणयू-
तिगोचरपर्यन्ताः सतलाः सोद्देशाः साम्रमधूकाः
सजलस्थ

„ 35 लाः सोपरिकराः सदशापराधाः सचौरोद्धरणाः परिहृत-
सर्वपीडाः अचाटभटप्रवेशा अकिंचित्प्रग्राह्यराजकुलीय

„ 36 समस्तप्रत्यायसमेता भूमिच्छिद्रन्यायेनाचन्द्रार्कक्षि-
तिसमकालम् पूर्वदत्त भूक्तभुज्यमानदेव ब्रह्मदेय-
वर्जिताः मया

„ 37 मातापित्रोरात्मनश्च पुण्यशोभितवृद्धये ॥ सुवर्णद्वीपा-
धिपमहाराज श्री बलपुत्रदेवेन दूतकमुखेन वयम्वि-
ज्ञापिताः यथा मया

„ 38 श्री नालन्दाम्विहारः कारितस्तत्रभगवतोबुद्धभट्टारकस्य
प्रज्ञापारमितादि सकलधर्मनेत्री स्थानस्यायार्थे तांत्रि

„ 39 क बोधिसत्व गणस्याष्ट महापुरुष पुद्गलस्यचातुर्द्दिशा-
र्यभिक्षुसंघस्य बलिचरुसत्र चीवर पिण्डपातशयना-
सनग्लान प्रत्ययभे

„ 40 षज्याद्यर्थ धर्मरत्नस्य लेखनाद्यर्थं विहारस्यच खण्डस्फु-

टितसमाधानार्थं शासनीकृत्य प्रतिपादिताः यतो-
भवद्भिः सर्वैरेव

,, 41 भूमेर्दानपालन गौरवादपहरणे च महानरकपातादिभ-
याद्दानमिदमभ्यनुमोद्य पालनीयं प्रतिवासिभिर-
प्याज्ञाश्र

,, 42 वणाविधेयैर्भूत्वायथाकालं समुचित भागभोग करहिर-
ण्यादि प्रत्यायोपनयः कार्य इति ॥ सम्वत ३९ कार्तिक
दिने २१

Reverse

,, 43 तथा च धर्मानुशन्सनश्लोकाः बहुभिर्वसुधा दत्ता
राजभिः ।

,, 44 सगरादिभिः । यस्य यस्य यदा भूमिस्तस्य तस्य तदा
फलम् ॥ (१५)

,, 45 स्वदत्ताम्परदत्ताम्वायो हरेत् वसुन्धरा । सविष्टायां
कृमिर्भूत्वा पितृभिः

,, 46 सहपच्यते ॥ (१७) षष्ठिवर्षसहस्राणिस्वर्गे मोदति
भूमिदः । आच्छेत्ता चानुमन्ताच तान्येव

,, 47 नरके वसेत् ॥ (१८) । अन्यदत्तां द्विजातिभ्यो यत्ना
द्रक्ष युधिष्ठिर । महीं महीभृतां श्रेष्ठ दा—

,, 48 नाच्छ्रेया तु पालनम् ॥ (१९) । अस्मत्कुलक्रममुदार-
मुदाहरद्भिरन्यैश्च दानमिदमभ्यनुमोदनीयं । लक्ष्म्या
स्तडित्सलिलबुद्बुदच—

,, 49 चलाया दानं फलं परयशः परिपालनंच ॥ (२०) ।

इति कमलदलाम्बु बिन्दुलोलां श्रियमनुचिन्त्य मनुष्य जीवितं च। सकलमि—

,, 50 दमुदाहृतं च बुध्वा न हि पुरुषैः परकीर्त्तयो विलोप्याः ॥ (२१)। दक्षिणभुज इव राज्ञः परबलदलने सहाय निरपेक्षः।

,, 51 दूत्यं श्री बलवर्मा विदधे धर्म्माधिकारेऽस्मिन ॥ (२२)। अस्मिन् धर्म्मारम्भे दूत्यं श्री देवपालदेवस्य। विदधे श्री बलवर्मा व्याघ्रतटी मण्डलाधिपतिः ॥ (२३)।

,, 52 आसीदशेष नरपालविलोलमौलि मालामणि द्युति विबोधितपादपद्मः। शैलेन्द्रवश तिलको यवभूमिपालः श्री वीरवैरिमथना—

,, 53 नुगताभिधानः ॥ (२४)। हस्थैरथलेषुकुमुदेषु मृणाली-नीषुशङ्खेन्दु कुन्द तुहिनेषु पदन्दधाना। निःशेष दिङ्-मुखनिरन्तर लब्ध गीतिः

,, 54 मूर्तेव यस्य भुवनानि जगाम कीर्तिः॥ (२५)। भ्रूभङ्गे भवति नृपास्य यस्य कोपाभिन्नाः सह हृदयैर्द्वि-षांश्रियोपि। वक्राणामि—

,, 55 हहि परोपघातदक्षा जायन्ते जगति भूषङ्क्तिप्रकाराः ॥ (२६) तस्याभवन्नयपराक्रमशीलशाली राजेन्द्रमौलिशि-शतदुर्ल्लंकितादिघ्र—

,, 56 युग्मः। सूनुर्युधिष्ठिरपराशरभीमसेन कर्णार्ज्जुना-र्ज्जितयसमराग्रवीरः॥ (२७)। उद्धूतम्बरतलाद्युधि सञ्चरन्त्या यत्सेनयार्वानिरजः प—

,, 57 टल पदोत्थम् । कर्णानिलेन करिणां शनकम्बितीर्णं
-गण्डस्थलमदजलैः शयमाम्वभूव ॥ (२८) ।अकृष्ण-
पक्षमेवेदमभूद्भुवनमण्डलं ।

,, 58 कुलन्देत्याविपस्येव यद्यशोभिरनारतम् ॥ (२९) । पौ-
लोमोवसुराधिपम्य विदितासंकल्पयोनेप्रीतिः शैलसुते-
वमन्मथरि—

,, 59 पोर्लदमीमुरारेरिव राज्ञः सोमकुलान्ययस्य महतः
श्रीधर्मसेतोः सुता तस्याभूद्वनोभुजो ऽग्रमहिषी तारेव
ताराह्वया ॥ (३०) । माया—

,, 60 यामिव कामदेव विजयी शुद्धोदनस्यात्मजः स्कन्दो
नन्दितदेववृन्दहृदयः शम्भोरुमायामिव । तस्यान्तस्य
नरेन्द्रवृन्द विनमत्पादारवि—

,, 61 न्दासनःसर्वोर्वोपतिगर्वखर्वणचणः श्रीबालपु-
त्रोऽभवत् ॥ (३१) । नालन्दा गुण वृन्द लुब्धमन-
साभक्त्या च शौद्धोदनेर्बुध्वाशैलसरित्तरगतरलां

,, 62 लक्ष्मीमिमां चोभनाम् । यस्तेनोन्नतसौधधामधवलः
सङ्घार्थ मित्र श्रिया नानासद्गुणभिक्षुसंघ वसति-
स्तस्याम्विहारः कृतः ॥ (३२) । भक्त्या

,, 63 तत्र समस्तशत्रुवनितावैध -यदीक्षागुरुं कृत्वा शासन-
माहितादरतया यम्प्रार्थ्य दूतैरसौ । ग्रामान् पञ्च वि
पञ्चितो- परियथोद्देशा

,, 64 निमानात्मनः पितृणां क हिताद्याय च ददौ श्रीदेवपालं
नृपं ॥ (३३) ।

यावत्सिन्धोः प्रबन्धः पृथुलहरजटाक्षोभिताङ्गचगङ्गा
गुर्व्वीं।

,, 65 धत्ते फणीन्द्र. प्रतिदिनमचलो हेलया यावदुर्व्वीं।
यावच्चास्तोदयाद्रीरवितुरगखुरोद्दृष्ट चूडामणी
स्तस्तावत्सत्सकीर्तिरेषा प्रभव-

,, 66 तु जगताम्सत्क्रिया रोपयंती ॥ (३४)।

(b) [v] Ghosrawa Stone inscription of Devapal

,, 1 श्रीमानसौ जयति सत्वहित प्रवृत्त–सन्मानसाधिगत--
तत्वनयो मुनीन्द्रः । क्लेशात्मना दुरितनक्र-दुरासदान्तः
ससार सागर समुत्तरणैक सेतुः ॥ १ ॥

,, 2 अस्यास्मद् गुरवो बभूव रबलाः सम्भूय हर्तुं मनः का
लज्जा यदि केवलो न बलवानस्मि त्रिलोक प्रभौ ।
इत्यालोचयते

,, 3 व मानसभुवा यो दूरतो वर्जितः श्रीमान विश्वमशेष
मेतदवताद्बोधौम वज्रासनः ।।२।। अस्त्युत्तरापथ विभू-
षण भूतभूमि-र्द्देशोत्तमो न

,, 4 गरहार इति प्रतीतः । तत्रद्विजाति रुदितोदित-वंशजन्मा
नामेन्द्रगुप्त इति राजसखोबभूव ।। ३ ॥ रज्जेकया
द्विजवरः सगुणी गृ

,, 5 हिण्या युक्तोरराज कलया मलया यथेन्दुः । लोकः
पतिव्रतकथा -परिभावनासु सकीर्त्तनं प्रथममेव करोति
यस्याः ॥ ४ । ताभ्यामजा

,, 6 यत सुतः सुतरां विवेकी यो बाल एव कलितः परलोक
बुद्धया । सर्व्वोपभोग-सुभगेपि गृहे विरक्तः प्रव्रज्यया
सुगत-शासनमभ्युपै

,, 7 तुम ।।५।। वेदानधीत्य सकलान् कृतशास्त्रचिन्तः
श्रीमत् कनिष्कमुपगम्य महाविहारम् । आचार्यवर्य

मथ स प्रशम-प्रशस्य सर्व्वज्ञशान्ति मनुगम्य

„ 8 तपश्चात् ॥३॥ सोयॅ विशुद्धगुण-सम्भूत-भूरिकीर्त्तिः शिष्योऽनुरूप गुणशील-यशोभिरामः । बालेन्दुवत कलिकलङ्क विमुक्त कान्तिर्वन्द्यः

„ 9 सदा मुनिजनैरपि वीरदेवः ॥७। वज्रासन वन्दितु मेकदाऽथ श्रीमन्महाबोधिमुपागतोऽसौ । द्रष्टु ततोऽ गात् सहदेशि-भिक्षून् श्रीमत् यशोवर्म्म

„ 10 पुरं विहारम् ॥८॥ तिष्टन्नथेह सुचिर प्रतिपत्ति-सार. श्रीदेवपाल भुवनाधिपलब्ध-पूज । प्राप्त-प्रभ· प्रतिदिनोदय-पूरिताश. पूषेव-दारित

„ 11 तमः प्रसरोरराज ॥९॥ भिक्षोरातमसम सुहृदभुजइव-श्री सत्यबोधेर्निजो नालन्दा परिपालनाय नियतः संघस्थितेर्यस्थित· । येनैतो स्फुटमिन्द्रशैल-मुकुट-श्री चैत्य चूडामणी

„ 12 श्रामण्यव्रत-सम्वृतेन जगत श्रेयोऽर्थमुत्थापितौ ॥१०॥ नालन्दया च परिपालितयेह सत्या । श्रीम

„ 13 द्विहार-परिहार-विभूषिताङ्गया । उद्भासितापि बहु-कीर्तिवधू-पतित्वे यः साधु साधुरिति साधुजनैः प्रशस्तः ॥११॥ चिन्ताज्वरं शमयताऽर्त्तजन—

„ 14 स्य दृष्ट्या धन्वन्तरेरपिहि येन हतः प्रभावः । यश्चो-प्सितार्थ-परिपूर्ण-मनोरथेन लोकेनकल्पतरु तुल्यतया गृहीत. ॥१२॥ तेनैतद

„ 15 त्र कृतमातम मनोवदुच्चै-र्वज्रासनस्य भवनं भुवनो त्तमस्य । सञ्जायते यदभिर्वाद्य विमानगानां

कैलासमन्दर--महीधरशृङ्ग--शङ्का ॥१३॥ सर्व
,, 16 स्योपनयेन स वसुहृदामौदार्यमभ्यस्यता सम्बोध
विहितस्पृहं सहगुणैर्विस्पर्द्धि वीर्य्यन्तथा। अत्रस्थेन
निजे निजाविह बृहत पुण्याधिकारे
,, 17 स्थिते येन स्वेन यशोध्वजेनघटितौ वंशावुदीचीपथे
॥१४॥ सोपानमर्गमिव मुक्ति पुरस्य कीर्तिमेत्ता
विधाय कुशलं यदुपात्तमस्मात्।
,, 18 कृत्यादित. सपितरं गुरुवर्गमस्य सम्बोधिमेतु जन-
राशिरशेष एव ॥१५॥ यावत् कूर्म्मो जलधिवलयां
भूतधात्रीं विभतिध्वान्तध्वंसी
,, 19 तपति तपनो यावदेवोग्ररश्मिः। स्निग्धालोकाप शिशि-
रमहसा यामवन्यश्च यावत् तावत् कीर्त्तिर्जयतु भुवने
वीरदेवस्य शुभ्रा ॥१६॥

Inscriptions of Surapala

The two Bihar Buddha image inscriptions of the reign of Surpala, referred to by R D Banerjee, have been discovered They are dated in the second year and record the erection of images at the Uddandapur Vihara by an old Buddhist monk Purnadasa

Line 1 ॐ महाराजाधिराज श्री सुरपाल देव राज्य सम्वत् २

„ 2 द्विराश [था] द वदि ११ अस्मिन सम्वत्सर मास दिव

„ 3 मानुक्रमे श्रीमदुद्दण्डपुरो [डो] इह विहाय नेवा

„ 4 सिक मिन्वुद्रेप [देश] विनिर्गत पाडिक्रमण विहार बृद्ध

„ 5 परिपध्य [शुद्ध] प्रदर्शिणा स्थविर पूर्णदासेन स्वकारित चैत्ये भट्टारकस्य शिला प्रतिभा देवद्ध [यध] स्मीय प्रदि स्थापित यत पुराय [] माता पितरौ अध्याय पूर्व कम कृत्वा अनुतर ['] सकलसत्वगाशे [:] इतिः

Note —The object is to record the consecration of the image of Buddha in a Caitya constructed by the donor. The ceremony of consecration by elder Purandasa who was the oldest man in Padikraman Vihara

[d] (i) Gaya Inscription of Narayanpala (in the 7th year of his reign)

Line 1 ॐ नमो पुरुषोत्तमाय नमः ॥ ॐ जयति जगति नाथः
प्रस्फुरक=कारुमूर्त्तिर=जगद् अरि विनिहन्ता श्री मद्
=एको मुरारिस=तदनु मुनि जानोयम् स्थिर संश्लेशा
राशिः स्फुर —

,, 2 द्=अमल गुणायाम् ध्यान वृतो स्थिरात्मा ॥
प्रोद्भूताति दर्पे प्रबल मनसंत्रास हेतु स्वाभाव्म्
कृत्वैतन नारसिंहम् स्फुट विकट सटम रूपमत्य उग्र
रौद्रम् । ये

,, 3 न=श्रोदोऋणाः पृथ्व्याम् खर नकर करैर=भेदितो
दैत्यराजाः श्रीमान=लौकेकनाथो भुवनहित विधाता
पातु युष्मान=स विष्णुः ॥ श्रीमान=अशेष शुभ
सम्भृत चारु

,, 4 मूर्ति· भद्रः सुनिरम्मल धियाम् प्रवरो श्री ग्राह (?) ।
प्राप्तोदयादित कुले सुकृति वभुव यो वामदेव इति
सर्वजगत=प्रतीत । तस्य आत्मजः प्रियतमो
विदुषाम् समा —

,, 5 सित यम् सहीदेवामिति बन्धुजनो जुहाव । तस्याभवत
=सुतवरो वरधर्मवृत्तिः सम्मानितो गुरु जनैरपि
वप्पदेवः ॥ सर्व्वार्थ सिद्धिकरणैक निधान भूता सौ —

,, 6 न्दर्य गर्भ रुचिरामलरूप सम्पत पत्नी च तस्य कमलेव

सदा प्रशस्ता ख्याता भप न जगति वल्लभ देऽयतिष्ठा
॥ ताभ्यामाजन्याम् अजायत सुतोमाला—

,, 7 धर्म वृत्तिरव्राक काय चित कृत सभ्यमनोभिमानी।
ब्रह्मो पवीत चरिते व्रत सगत श्री यो भाण्डदेव इति
पूर्वमिह प्रनीतः॥ विद्युल्लोलामत्तण परिणातीम्

,, 8 सॅस्कृतानाम् विदित्वा जन्मोत्तरा सादामल भुवन
प्राप्तुमभ्युदगतनेन। येनात्यर्थम् सुकृत मतिभि सेविते
ध्यान मार्गे चेतो न्यास्तम् (सु) विमलम् ज्ञानमा
स्वादना—

,, 9 य॥ तेनानेक द्विज जन भुवि प्रेमवृत्या गयायाम्
श्रीमद् एषो यतिषु विहित (:) सद्गुणा वासवासः
ज्ञातम् श्रेयो यद् अमल गुणम् ब्रह्मचार्या श्रमेण तेना

,, 10 स्त्वज्जगदमलनम् क्षीणौ संक्लेश राशिः॥ चातु
विद्याम् समस्त प्रसमित कलुम् [?] ब्रह्मसम्मन्यस्त
बृति श्रो मन्तां सद्क्रियात्मा प्रथिन पृथुगुणाम्
प्रार्थय—

,, 11 त्येष मौनी भुयालोको स्मित श्रीः पर कृत सुकृतैः
पालने रक्षणे च तत् कर्त्तव्यम् भवद्भिः स्थिरवमल
गुणः स्थानि वाय यथायम्॥ सद्वृत्ता मलवृ—

,, 12 त्तिभिः स्फुट तरम् जाता दरैः सर्व्वतः सर्व्वानेता (न
भाविन (:) पार्थिवेन्द्र भूयो भूयो जाचति = ऐष मौनी
सामान्तोयम् धम सेतुरनाराण (म्) काले काले पा—

,, 13 लनेयो भवद्भिः॥ व्याज्ञानार्यवहिस = तपोधन
जनैः स्थातव्यमत्राश्रमे॥ इतिएतत् व्रतधारी भिरनि-

यमित भुयाद्=यथा नान्यथा। कर्त्तव्यम् तदिहा-
मलम् प्रि—

„ 14 यतमैर विप्रैर गयावासिभिः ॥ स्फुरतु कीर्तिरियम्
गुणशालिनी सकल सत्व हितोदय हेतवे तपति
यावदयम् भुवि भास्करो हिमक—

„ 15 रेण सहामल दीधितिः। श्री नारायणपालदेव इति
प्राप्तोदय भूपति भूतो भूमि भूजा (म्) शीरो भीर
अमल यस्योचित (म्) शासनम् राज्ञस्त—

„ 16 स्य गुणात्म लस्य महतः सम्वत्सरे सप्तमे वैशा
ख्याम् शुभ सम्भृतेन विधिना लब्ध प्रतिष्ठितमठ।

———

[d] (ii) ndian Museum Stone inscription of Narayanpal (Year 9)

Line 1 ओं सम्वत ९ वैशाख शुदि ५ परमेश्वर श्री नाराय-णपालदेव राज्ये अन्धवैषयिक शाक्य भिक्षु स्थविर धर्म्ममित्रस्य

,, 2 यदत्र पुण्यम् तद्भवत्वाचार्योपाध्याय माता पितृ पूर्व्वंगमम कृत्वा सकल सत्वराशेरनुत्तर ज्ञान प्राप्तयिति ॥

[d] (iii) Bhagalpur Copper-plate grant of Narayanapala (Year 17)

Line 1 ओं स्वस्ति । मैत्रीङ्कारुण्य रत्न प्रमुदित हृदयः

,, 2 प्रेयसीं सन्दधानः सम्यकसम्बो धिविद्यासरिदम्

,, 3 लजलक्षा लिताज्ञान पङ्कः । जित्वा यः काम—

,, 4 कारिप्रभ वमभिभवं शाश्वतीम्प्राप शान्ति स श्री मान् लोकनाथो जय—

,, 5 ति दशवलोऽन्यश्च गोपाल देवः ॥ (१) लक्ष्मी जन्म निकेतन ममकरो वोढुं क्षमः क्ष्माभरं पक्ष च्छेद भयादु—

,, 6 पस्थितवतामेकाश्रयो भूभृता । मर्यादा परिपालनैक निरतः शौर्यालयोऽस्माद भूद्दु ग्धाम्वोधि विलास—

,, 7 हासि महिमा श्री धर्म्मपालो नृपः ॥ (२) जित्वेन्द्र राज प्रभृतीनरातीनुपार्ज्जिता येन महोदयश्रीः । दत्ता पुनः

,, 8 सावलिनार्थं यित्रे चक्रायुधायानति वामनाय ॥ (३) रामस्येव गृहीत सत्य तपसस्तस्यानु रूपो गुणैः सौमित्रेरुदपा—

,, 9 दि तुल्य महिमा वाक्पाल नामानुजः। यः श्रीमान्न यविक्रमैक वसतिभ्रातुः स्थितः शासने शून्याः शत्रु पताकिनी—

,, 10 भिरकरोदेकातपत्रा दिशः ॥ (४) तस्मादुपेन्द्र चरितै र्ज्जगतीम्पुनानः पुत्रो वभूव विजयी जयपाल नामा। धर्म्मद्वि—

,, 11 पां शमयिता युधि देवपाले यः पूर्व्वजे भूवन राज्य सुखान्य नैर्षत् ॥ (५) यस्मिन्भ्रातुर्न्निदेशा द्वलवति परितः प्रस्थिते

,, 12 जेतुमाशाः सीदन्नाम्नैव दूरान्निज पुरमजहादुत्क लानामधीशः। आसाञ्च क्रे चिराय प्रणयि परिवृतो विभ्रदु—

,, 13 च्चेनमूर्ध्ना राजा प्राग्ज्योति षानामुपशमिति समि त्सङ्कथां यस्यचाज्ञां ॥ (६) श्रीमान विग्रह पाल स्तत्सूनरजातश त्रुरि—

,, 14 व जातः। शत्रू वनिता प्रसाधन विलोपि विमलासि जलधारः ॥ (७) रिपवो येन गुर्व्वीणां विपदामास्पदी कृताः (।) पुरुषायु—

,, 15 षदीर्घाणा सुहृदः सम्पदामपि ॥ (८) लज्जेति तस्य

जलधेरिव जह्नु कन्या पत्नी बभूव कृत हैहय वंश
भूषा। यस्याः शुची—

" 16 नि चरितानि पितुश्चवंशे पत्युश्च पावन विधिः
परमो बभूव ॥ (९) दिक्पालः क्षितिपालनाय दधतं
देहे विभक्ताः

" 17 श्रियः श्री नारायणपालदेवमसृजत्तस्यां स
पुण्योत्तरं। यः क्षोणीपतिभि. शिरोमणि रुचा
श्लिष्टाङ्घ्रि श्रीठोपल न्यायो पा—

" 18 त्तमलञ्चकार चरितैः स्वैरेव धर्म्मासनं ॥ (१०)
चेतः पुराण लेख्यानि चतुर्व्वर्ग निबोनि च। आरि-
प्सन्ते यतस्त्यानि चरितानि मही भृतः ॥ (११)

" 19 स्वीकृत सुजनमनोभिः सत्यापित सातिवाहनः सूक्तैः।
त्यागेन यो व्यधत्त श्रद्धेयामङ्ग राजकथां ॥ (१२)
भयादरातिभिर्यस्य रण—

" 20 मूर्द्धनि विस्फुरन्। असिरिन्दी वरश्यामो ददृशे
पीत लोहितः ॥ (१३) यः प्रज्ञया च धनुषा च
जगद्विनीय नित्यं न्यवीविशद्—

" 21 नाकुलमात्मधर्मे। यस्यार्थिनः सविधमेत्य भृशं
कृतार्था नैवार्थितां प्रति पुनर्व्विदधुर्म्मनीषां ॥
(१४) श्री पतिर कृष्ण कर्मा विश्वा—

" 22 धरनायको महा भोगी। अनल महशोपि धाम्नाय—
श्चित्रन्नल समश्वरितैः ॥(१५) व्याप्ते यस्य त्रिजगति
शरच्चन्द्र गौरैर्यशो—

„ 23 भिर्म्मर्त्ये शोभान्न खलु विभरामास रुद्राट्टहासः ।
सिद्धस्त्रीणामपि शिरसिजेष्वर्धिताः केतकीना
पत्रापीडाः सुचिरम—

„ 24 भवन् भृङ्गशब्दानुमेयाः ॥ (१६) तपोममास्तु
राज्यन्ते द्वाभ्या मुक्तमिद द्वयोः । यस्मिन्विग्रह
पालेन सगरेण भगीरथे ॥ (१७) सखलु भा—

„ 25 गीरथीपथ प्रवर्त्तमान नाना विधिनौ वाटसम्पादित
सेतु वन्धन निहित शैल शिखर श्रेणी विभ्रमात्
निरतिशय घन घना घन घना ट्टीं—

„ 26 श्यामायमान वासर लक्ष्मी समारब्ध सन्तत जलद
समय सन्देहात् उदोचीनानेक नरपति प्राभृती कृता
प्रमेयहयवाहिनी खर—

„ 27 खुरोत्खातधूली धूसरितदिगन्तरालात् परमेश्वरसेवा-
समायाता शेषजम्वुद्वीप भूपालानन्तपादात भरन-
मदवनेः । श्री मु—

„ 28 द्गगिरिसमावासित श्रीमज्जयस्कन्धावारात् परम-
सौगतो महाराजधिराज श्रीविग्रहपालदेव पादा-
नुध्यातः परमेश्वरः पर—

„ 29 मभट्टारको महाराजाजिराज. श्रीमन्नारायण पालदेवः
कुशली । तीरभुक्तौ । कक्षवैपयिकस्वसम्बद्धाविच्छि-
न्नतलो—

„ 30 पेत मकुतिका ग्रामे । समुपगताशेषराज पुरुषान् ।
राजराज—

„ 31 नक । राजपुत्र । राजामात्य । महासान्धि विग्रहिक ।

महाक्षपटलिक । म—

„ 32 महासामन्त । महासेनापति । महाप्रतीहार । महाकर्त्ताकृतिक । महा—

„ 33 दौः साधसाधनिक । महादण्डनायक । महाकुमारामात्य । राजस्थानीयोपरिक । दाशापाधिक । चौरोद्धरणिक ।

„ 34 दाण्डिक । दाण्डपाशिक । शौल्किक । गौल्मिक । क्षेत्रप । प्रान्तपाल । कोट्टपाल । खण्डरक्ष । तदायुक्तक । विनियुक्तक । हस्त्य—

„ 35 श्वोष्ट्रनौब व्यापृतक । किशोर । बडवा । गोमहिष्याजाविकाध्यक्ष । दूतप्रैषनिक । गमागमिक । अभित्वमाण विषयपति

„ 36 ग्रामपति । तरिक । गौड । मालव । खश । हूण । कुलिक । कर्णाट । लाट । चाट । भट । सेवकादीन् । अन्यांश्चाकीर्तितान् ।

„ 37 राजपादोपजीविनाः प्रतिवासिनो ब्रह्मणोत्तारान् । महमोत्तम-कुरोगमेदान्ध चण्डालपर्यन्तान् । यथार्हं मानयति ।

„ 38 बोधयति । समादिशतिच । मतमस्तु भवतां । कलशपोते । महाराजाधिराज श्री नारायणपालदेवेन स्वेयंकारितसहस्त्रा—

„ 39 यतनस्य । तत्रप्रतिष्ठापितस्य । भगवतः शिवभट्टारकस्य । पाशुपत आचायपरिषदश्च । यथार्हं पूजाबलि चरुसत्रनवक—

„ 40 र्म्माधर्थं । शयनासनग्लान प्रत्यय भैषज्य परिष्कारा·
द्यर्थं । अन्येषामपिस्वाभिमतानां । स्वपरिकल्पित-
विभागेन। अनवद्यभो—

„ 41 गार्थञ्च। यथोपरिलिखितमकुतिका ग्रामः। स्वसी-
मातृण यूतिगोचरपर्यन्तः । सतलः । सोद्देशः ।
साम्रमधूकः। सजल—

„ 42 स्थलः। सगर्त्तोषर.। सोपरिकरः। सदशापचार.।
सचौरोद्धरणः । परिहृत सर्व्वपीड़ः । अचाटभट-
प्रवेश.। अकिञ्चि—

„ 43 त्प्रग्राह्य.। समस्तभाग भोग कर हिरण्यादिप्रत्याय-
समेत. । भूमिच्छिद्रन्यायेना चन्द्रार्कक्षितिमकालं-
यावत्मातापि—

„ 44 त्रोरात्मनश्च पुण्ययशोऽभिवृद्धये । भगवन्त शिवभ-
ट्टारकमुद्दिश्य-शासनीकृत्य प्रदत्तः । ततो भवद्भि.
सर्व्वरेवानु—

„ 45 मन्तव्य भाविभिरपि भूपतिभि भूमे र्द्दानफल
गौरवादपहरणे च महानरकपात भयाद्दानमिदम-
नुमोद्य पालनीयं प्र—

„ 46 तिवासिभिः क्षेत्रकरैश्चाज्ञा श्रवण विधेयीभूय यथा-
कालं समुचित भागभोगकरहिण्यादिसर्व्वप्रत्यायो-
पनयः का—

„ 47 र्य इति। सम्वत् १७ वैशाखदिने ९ (II) तथा
चधर्मानु शंसिनः श्लोकाः । वहुभिर्व्वसुधादत्ता
राजभिः सगरा दिभिः (i)

„ 48 यस्य यस्य यदा भूमिस्तस्यतस्यतदा फलं ।। षटि वर्ष सहस्त्राणि स्वग्गे मोदति भूमिदः । अच्छेत्ताचानुमन्ता च तान्येव न—

„ 49 रके वसेत् ।। स्वदत्ताम्वा पर दत्ताम्वा यो हरेत वसुन्धरा । स विष्ठायां कृमिर्भूत्वा पितृभिः सहपच्यते ।। सर्व्वानेतान् भाविनः

„ 50 पार्थिवेन्द्रान् भूया भूय प्रार्थयत्येषरामः । सामान्योऽयन्ध-म्मसेतुर्नृपाणा काले काले पालनीयः क्रमेण ।। इति क—

„ 51 मलदलाम्वुविन्दुलोला श्रियमनुचिन्त्य मनुष्यजीवितञ्च । सकलमिदमुदाहृतञ्चवुद्धा नहि पुरुषै परकीर्त्तयोविलो—

„ 52 प्याः ।। वेदान्तैरप्यसुगमतमं वेदिता ब्रह्मतर्थं यः सर्व्वासु श्रुतिषु परमः सार्द्धमङ्गैरधीती । यो यज्ञानांसमुदितमहाद—

„ 53 क्षिणानां प्रणेता भट्टः श्रीमानिह स गुरवोदूतकः पूण्यकीर्तिः ।।

(१८) श्रीमता मङ्गदासेन शूभदासस्य शूनुना । इदंसा-

„ 54 शानमुत्कीर्ण्णं सत्समतट जन्मना ।। (१९)

श्री नारायणपाल देवस्य (Seal)

[d] (iv) Udandpur Image Inscription of Narayanapala (54th Year)

श्री नारायणपालदेवराज्ये सम्वत् ५४
श्री उद्दण्डपुर वास्तव्यराणक उच्चपुत्र ठारुकस्य ।

[e] (i) Kurkihar Image Inscription of Rajyapal (Year 28)

Line 1 स्वस्ति श्रीमत्काञ्चीमलकुरवन्नस्ति ग्रामः सताम्मतः
नरसिह चतुर्वेदी मगलाख्यो महीयसाम् ।। द्विजाना-
मालयो रम्यो वेद वेदाङ्ग—

,, 2 वेदिनाम् । तत्र विप्रानवये शुद्धे लब्धजन्मा
गुणान्वितः ।।
यो वैरोचनसिहस्य स्थविरस्यगुणोदधेः ।।
प्रज्ञासिंहेति ख्यातः शिष्योभुद गुणिनाम् ।।

,, 3 मतः ।। सोऽकारयदिदम् विम्बम् सौगतम् घटनो-
ज्ज्वलम् । सुद्धरातिमयं भक्तया न्याय्यम्मार्गम्
समाश्रितः ।। अनेनपुण्येनाचार्योपाध्याय सहितम्

,, 4 जगत । मातापितृसमायुक्ताम् सौगतम् पद्वाप्नुयात-
श्री राज्यपालनाम्नि क्षितिभृति भुवमवति कीर्तिरिति-
महति । अब्देष्टाविशतिमे कृतासित दिनेष्ट
वैशाखे ।।

[e] (ii) Kurkihar Image Inscription of Rajyapal (year 31)

श्री राज्यपालदेव राज्ये सम्वच्छरे ३१
श्री मदापणक महाविहारे वस्ताव्य महिअरुभार्या
मूलकाया देवधर्म कृतम् । गोपाल ।

[e] (iii) and (iv) Kurkihar Image Inscriptions of Rajyapal (year 32)

स्वस्ति श्री राज्यपालदेव राजे सम्वच्छरे ३२
श्री मदापणकमहाबिहारे गोपालहिनो भार्या वाडु
कायाः देवधर्म कृतम् शोपालहोरा स्थपतिपातितम् ।
वसुधा ।

× × ×

स्वस्ति श्री राजयपालदेव राज्ये सम्वच्छरे ३२
श्री मदापणक महाविहारे वास्तव्य गोपालहिनो
भार्या गौकया देवधर्म होरास्थपतिपातितम ।

[f] (i) Nalanda Image Inscription of Gopal II (year 1)

१ सम्बत् १ आश्विन सुदि ८ परमभट्टारक-महाराजा-
धिराज-परमेश्वर श्री गोपाल-राजनि श्रीनालन्दायां
२ श्रीवागीश्वरी-भट्टारिका-सुबर्णश्रीह्-सक्ता ।

[f](ii) Bodhgaya Buddha Image Inscription of Gopl II

" 1 कृत्वा मैत्रीं तनुत्रं स्फुरदुरुकरुणा खड्गमालम्बयन् यः
स्फूर्ज्जत-कन्दर्प-सेना-प्रलय-जलनिधेद्धानभाम प्रमोषी।
कल्पान्तादीप्त-वह्निज्वलितरवपुः क्रोध-जिह्मीकृ—

" 2 तभ्रु जिग्येनिऽर्वान्त-हेमद्‌युतिः ललितवपुः सोस्तु
भूत्यैजिनोवः ॥१॥
यः शारदेन्दु-किरणोज्वल-कीर्तिपुञ्जः
सम्बुद्ध पादशतपत्र मनः षड्ढ्रिः।
श्री धार्म्म भो--

" 3 मइति च प्रथित पृथिव्यां
सिद्धवो भवदनल्प कृपार्द्रचितः ॥२॥
तेनेयं शकशेनेन कारिता प्रतिमा सुनेः।
काङ्क्षताऽनुतरां वाधि जगतो दुःख-शान्तये ॥३॥

" 4 श्री गोपाल देव राज्ये।

[g] (i) Kurkihar Image Inscription of Vigrahpala (year 3)

Line 1 स्वस्तिश्रीम-विग्रहपालदेव विजयराजे सम्मत ३

" 2 देव धर्मोयम प्रवर महायान जैन प्रमोपास—

" 3 क दुलपसुतः तीकुकस्य ।

[g] (ii) Terracotta plaque of Vigrahpala II (year 8)

Line 1 ।सद्धम् । स्वास्त श्रीमान महाराज

„ 2 विग्रहपालदेवस्य विजयराज्ये

„ 3 सम्वत्सरे द देवधर्मोयम् शान्तरक्षितस्य ।

[g] (iii) Kurkihar Image Inscription of Vigrahpala II (year 19)

Line 1 स्वस्ति श्रीमन्त विग्रहपालदेव राजाधिराजः परमभट्टारक राजे सम्मत १६ ।

„ 2 महातम मृद्वल त । उतीमराकस्यः

[g] (iv) Kurkihar Imgae Inscription of Vigrahpala II (year 19)

Line 1 स्वस्ति श्रीमान विग्रहपाल देवस्य राजाधिराज :

„ 2 परमभटाकराजे सम्मत १६ महतम

„ 3 दुलपवन्धु-पेखोकायाः

[h] (i) Bodh-Gaya Inscription of Mahipala I (Inscribed in the 11th year of his reign)

Line 1 देवधर्मोयम ...तदभवत्वाचार्योपाध्यायमाता पितृ-पूर्व्वाङ्गमम् कृत्वा सकलसत्वराशेरानुत्तर ज्ञाना वाप्तया इति । महा—

2 (राजाधिराज-परमेश्वर-प) रमभट्टारक परम सागत श्रीमान महीपालदेव प्रवर्द्धमान विजयराज्येएकाद्-शमे सम्वत्सरे अभिलिख्य (माने)

„ 3 ……पञ्चम्यां तिथौ गन्ध-कूटा-द्वय-सहित …कारिताविति

[h] (ii) Nalanda Stone Inscription of Mahipala I (year II)

„ 1 ओ श्रीमन्महिपाल दे—

„ 2 व-राज्य-सन्वत् ११

„ 3 अग्निदाहोद्धारे

„ 4 गतेदेय धर्म्मोय प्रवर

„ 5 मा (म) हायान-यायिनः पर-

„ 6 मो पासक श्रोमत्तैलाढ—

„ 7 कीय ज्याविष (?) कौशाम्बी—

„ 8 विनिर्गतस्य हरदत्तनसु—

„ 9 ::गुरुदत्तासुत-श्री बाला—

„ 10 दित्यस्य। यदत्र पुण्यं त—

„ 11 द्भवतु सर्व्व सत्वराशे र—

„ 12 नुतर-ज्ञानावाप्तय इति।

Note —The object of this inscription is to record the placing of the door-jamb on which it has been inscribed when the restoration of the place after a conflagration was completed.

[h] (iii) Kurkihar Image Inscription of Mahipala I (year 31)

Line 1 स्वस्ति श्रीमन महिपाल देव राज्य म—

„ 2 म्वत ३१ सुवर्णकार केसवस्स ·· ····

„ 3 स्य देव धर्म्म—

[h] (iv) Imadpur Image Inscription of Mahipala I year 48

श्री मान महिपाल देवराज्यसम्मत ४८ ज्येष्ठ दिन शुक्ल पक्ष २ ।

[h] (v) Tetrawan Inscription of Mahipala I

The inscription consists of three lines of very small letter. The last word in the legible portion of the third line is the name of Mahipala

[i] (i) Gaya Narasingh temple inscription of Nayapal
(Inscribed in the 15th year)

Line 1 ॐ लदमीश्चिरङ्ग जयति वारि निधेरानेक मन्था
कुलादाधिगता पुरुषोत्तमस्य । स्निह्यन्तिरो
वलित सम्मद ,घूर्षमान नेत्रावलोकन निरस्त
समस्त विघ्ना ॥

,, 2 सेयम् ब्रह्मपुरा गयेति जगति ख्याता स्वयं वेधसा
स्थातुम् ब्रह्मविदाम् पुरोवघ टित मोक्षस्य सौख्यस्यच
बुमः किच भवन्ति यत्र पितरः प्रेता—

,, 3 लयावासिनः पादस्पृषत जलप्रदान विधिना नाका-
ङ्गना नायकाः ॥ अस्याम् वभूव पुरी वक्रगति
द्विजिह्वा सम्राड भुजङ्ग रिपुराच्युत पादसेवी । यो

,, 4 नाम विष्णुरथवद्विजराजवर्य्याः प्रीत्या सताम्च
परितोषइति प्रसिद्ध ॥ तस्माद्विधेरिव वभूव सनत-
कुमारः श्री सूद्रको विमल वुद्धिरानेकविद्यः ।

,, 5 भूयोपि येन विधिनैव कृता गयेयम् वाहवोर वलेन
सुचिरम् परिपालिता च ॥ तस्माद्धजायत सुतः सुतेवद्
द्विजानाम् यो भूत सुविस्मयरसा वहकरतक—

,, 6 श्च ॥ विश्वापकारक निराकृतये वतीर्न्नः श्री विश्व

रूप इति कीर्तिता विश्वकरूपः ॥ यम् प्राप्य चार्थी जनवृन्दमकल्प दानमापुभवत्त पुलका जालमन-

,, 7 न्त मोदम् । स्फिति स्फुरद्भन कृतार्थतया दुराप-चिन्तामणि ग्रहणकम् न कदापि दधमौ ॥ येनानु-सुरारि चरितेन महोदयेन यान्ता रसातल मिव्या-वनि—

,, 8 रुधृतेयम् श्री मद्गया कालमाला द्विजराज पत्त संक्षोभ कम्पित्तनुभुजविक्रमेण ॥ यस्मै विशुद्ध चरिताय निसम सौर्यराशि प्रियवावि—

,, 9 नयामल भूषणाय आवाल्यतः प्रभृति देवमानुष्य लोको बद्धाञ्जलिश्चिरतरम् स्पृयाम् चकार ॥ तेनैमानश्च गदाधरादि निलयव्याजेनताः की—

,, 10 कीर्त्तयाह स्वेतांशोरिव रश्मयाह सुघटित [ह] सन्ताप शान्त्यै सदा यत्राम्भोनिधि वीचीवद्धश दिशम प्रक्षालनैक क्षताः पाताल प्रतिवासी घोर तिम—

,, 11 र प्रध्वंस दीपाइव ॥ इनः सन्तु गयापुरो सुतरुणी भूषावली कीर्तयो यावच्चन्द्र दिवाकरौ च गगनं श्री विश्वरूपाभय. कर्त्तासाम चतथा पु—

,, 12 राणपुरुषाण राज्ञोपिधिकृत्य सधेनाकस्मिक विस्मयैक रसिको लोको मुहुर मुच्छितः । दाक्षिण्या-

दुपरुधेन प्रीतिस्तिमित चेतसा। । प्रशस्तिरे—
„ 13 ष विहिता वैद्य श्री ब्रजपाणिणा। विज्ञान कौशलो
ल्लास जातनैपुण कर्मणा प्रशस्तिरेष लिखिता
सर्व्वानन्देन धीमता। चीराम्भो निधि मेख—
„ 14 ला मणिगुण आलकारिताया भुवो भत्तुः श्री नय-
पाल देवनृपतेराज्ञा श्रीयम् विभ्रतः सम्वृते तस्सैव
पञ्चदशमे राजस्य सम्वत्सरे कीर्त्ति. सिद्धिमुपागता
भगवत.
„ 15 श्री मद्गदाधारिण. ।

[i] (ii) Krishna-dwarika temple of Nayapala (Year 15)

Line 1 ओं नमो भगवते वासुदेवाय ॥ उन्निद्र-नीलकमलाकर-काय कान्ति. स्वर्णाभिराम-रुचिर-द्युति-पीतवासाः । उद्भास्यमान इव चञ्चलया घनौघो विष्णुप्रियाद्वय- वरेण युनक्तु युष्मान् ॥१॥

,, 2 व्यानिर्म्माय समस्तवस्तु-सुखिनो विप्रान् प्रजानापतिर्यो मध्यास्त इवात्मनैव परितो मूर्ति प्रवञ्चं दधत् । उत्तुङ्गै शरदभ्र-शुभ्र-शुचिभि. सौधैः कृतालङ्कृतिर्म्मोत्तिद्वारमनर्गलं ज—

,, 3 गति सा श्रीमद्गयागीयते ॥२॥ वेदाभ्यास-परायण-द्विजगणोद्गीस्मा - पाठक्रमादुच्चैरुच्चरित - ध्वनि-व्यतिकरै र्यत्नावधार्या गिरः । किञ्चाजस्त्रित-होम धूमपटल-ध्वान्तावृतो साम्प्रतं धर्म्मो

,, 4 यत्र महाभयादिव कलेः कालस्य संतिष्ठते ॥३॥ अत्याधृतैर्गुणनये (रु रु) नीलपद्मा-निश्च्छद्म-सद्मनि संतां सुकृताभिमर्शे । नीहार-हार शरदिन्दु-विबुद्ध-कुन्द-सन्दोह-सुन्दर-महाद्विजराज वंशे ॥४॥

,, 5 अजातलक्ष्म-द्विजराज-शेखरः समन्ततो भूरि-विभूति-भषणः । बभूव धन्यो गिरिराज पुत्रिका-प्रियो

प्रमयः पारितोष मज्ञकः ॥५॥ अनन्य सामान्य
दिगन्त मन्दिरै त्रिवर्गि-ससर्गि-गुणा,
,, 6 श्रयैजगत् । शरत्-सुधाधाम-गभस्ति तस्करैः समन्ततो
यस्य यशोभिराबृतम् ॥६॥ द्विजवर विनता नन्दन
निरन्य गतिक समाश्रिता लक्ष्म्या । तस्य तदनु तनु-
जन्मा मुररिपुरिव शूद्रको भूतः ॥७॥
,, 7 दूगोद्याल-शरत्-सुधानिधि-सुधा कुन्दाभिरामच्छवि-
च्छायै श्छन्नमभूद् यशोभिरभितो यस्य त्रिलोकी
तलम् कपूरैरिव पूरित मलयज क्षोदैरिवालेपितं
क्षुब्ध-क्षीर-पयोधि तुङ्गलहरी लेहैरिवा प्ला—
,, 8 वित ॥८॥ सत्यं-धर्म्म-सुते स्थिरत्वमचले गाम्भीर्य
मम्भोनिधौ बह्वाश्चर्य्य गुणा मति सुरगुरौ तेजस्वित
भास्वति । एते सन्तिगुणाः पृथक् परमुदञ्चद्भिर्जिगीष
रसै-र्विश्वादित्य मजा जनत् सुत—
,, 9 मसा वेभिः समस्तै श्रितम् ॥९॥ य स्तापान्त कर
सुधानिधिरिवापूर्ण. कलानां गणैर्य स्तुङ्गाभ्युदयाश्रितो
रविरिव प्रौढः प्रतापोदयः । प्रत्यन्तः करणाभि-
वाञ्छित-फलाज-स्रप्रदानश्रिमिः श्लिष्टो
,, 10 जङ्गम कल्पवृक्ष इव यो जातः समस्तार्थिनाम् ॥१०॥
दोर्द्दण्डद्वय चण्डविक्रम कशा दिग्वाजि-शौर्याद्भुत-
क्रीडोंल्लित-वारिवर्ग-विपिनः प्रौढ प्रतापारुणः ।

वार्य्यालीषु यथाब्धिरापदि तथा प्रश्य—
,, 11 क्तः-धैर्य्यक्रमः किञ्चप्राकृतसर्वा-गर्व्व विमुखः सम्पत्-
स्वनल्पास्वपि ॥११॥ श्रियान्यथ्यासङ्गा विसदृश-
समाचार-विकलो जनोमद्य नेत्रस्खलनमुपहासञ्च
भजते । इयंसा यस्य श्राः समुचित-वि—
,, 12 लासाभ्युदायनी यथार्थालङ्कारः समधिक जनानन्द
विषयः ॥१२॥ यस्याकृत्रिम-मेदुराश्रित-महीपर्य्यन्त-
सम्बासिभि-र्न्नृत्यारम्भ-विजृम्भनोद्धत-भुजैरुदगीयमाना
जनैः । सानन्दोत् पुलकं
,, 13 विमानमसकृद्दे वैर्विलम्ब्याम्बरे श्लाघाघूर्णित-मूर्द्धभि
र्निपतितैः (?) कीर्तिसमाकर्ण्यते ॥१३॥ साभ्यसूय-
परितोष-लेशतो वाञ्छितानि-शनकैः सकटाक्ष । यस्य
विद्विडनुकूल-कुलानि प्राप्नुवन्ति निध—
,, 14 नानि धनानि ॥१४॥ निनदन्ति दन्तिवरहन्ति (?)
यानिकुञ्चितानि तानिचदुरुन्नयानि । अतिमन्दमन्द-
मतिगह्वरासु निवसन्ति सन्ति गिरिकन्दरासु ॥१५॥
सन्नतेन ततेन तेजसा दुर्न्नयस्य नयस्यविद्वि—
,, 15 षां । आकुलानि कुलानि दुर्गमा द्दुर्गतानि गतानि
दुर्गमम् ॥१६॥ सप्ताम्बु-राशि-विसरत्-श्लथमेखलाया
अस्या भूवः कति न भूमिभुजा बभूवुः । सिद्धिं न
कस्यचिद गाद्यदनल्प-कल्पैस्तनेनात्र कीर्तिम—

,, 16 कारि जनार्द्दनस्य ॥१७॥ कैलासाचल-शृङ्ग-सभ्रम-
मधः कुर्व्वत् प्रोरूढोदय-प्रालेयद्युति-कुन्दसुन्दर यशः
पुञ्जोपमेयाकृति । यत्रोतुङ्ग- शखाग्र-सङ्गत-शरच्च-
न्द्रांशु-शुभ्र-श्रिभिर्म्मुञ्चन्नूतन-मञ्जरीरिवपता—
,, 17 काभिर्न्नभो राजते ॥१८॥ आजिवैद्य-सहदेव-निरुक्तिः
तत्प्रशस्तिरियमस्तु नितान्तं प्रेम सौहृद-सुखैक-
धरित्री सज्जनस्य हृदये रमनीव ॥१९॥ श्रीमतोऽविप
सोमस्यात्मजेनार्ज्जितं यशः । उत्—
18 कीर्ण-कर्म्मणि श्रीमत सट्टसोमेन शिल्पिना ॥२०॥
समस्तभूमण्डलराज्य भार-माविभ्रति श्री नयपाल-
देवे । विलिख्यमाने दशपञ्च-संख्य-सम्वत्सरे
सिद्धिमगाच्च कीर्तिः ॥२१॥

[j] i) Aksayavat Inscription of Vigrahpala III (5th year of his reign)

,, 1 ॐ ॐ नमः शिवाय ।। दयाभाण्डागारम् निरवधि जगद्दोष विजयिस्फुरज्ज्ञानज्योतिःप्रसरनिहत ध्वान्त निचयम् । किमप्यन्तः सान्तम् सहजसुख पियुष लहरी........

,, 2 र हृदयमन्धो हरतु वः ।। आसन्धाया कलंङ्कान प्रति वपुष इवब्राह्मणान्नन्वज जन्मा स्वर्ग द्वाराधिरोहामृत सुख प्राप्तये प्रत्य भाजः । साक्षात संसार भूषाव.

,, 3 श्रीमद्भुमिम् शाश्वत त्रैलोक्य लक्ष्मी निलयामिव पुरीम् श्री गयामेप चक्रे ।। गयायामेतस्याम् पुरि सकल सौन्दर्य निलये द्विजातानाम् मान्यो द्विज पद सरोजाक.......

, 4 .. स प्रेमना परम परितोषस्य जननाद् अभुद् ध्यानः श्री मान स खलु परितोषाह्वय इति ।। तस्माद्भूज्जल-निधेरिव सीतरश्मिः श्री शूद्रको विमल कान्तिरनन्त लक्ष्मी [ ]........

,, 5 कण्ठस्त्रवाभिराममान्दितानि यशसा भुवनान्तराणि ।। आसाद्यामरराज राज्य पदवीम् देवीभीराक्रीदितम्

दिव्यात्मात्वमनंग दर्पदलनोद्गारैक मोदम् वपु [:]...

„ 6 न्ति [?] कौतुक रसानमर्त्यों वतीरण्णास ततो जातो देव कुमार मुर्त्तिरस्महः श्री विश्वरुपाह्वयः ॥ यो विध्वस्त समस्त वैरि निवहः स्फुरयत प्रतापानलः सौजनस्य निदान . . ...

„ 7 म केलि द्रुमः । सान्द्रानन्दमयो निगगमधुर व्याहारत्नाकरो दिनानाथ विपन्न चारण गण त्राणाय चिन्तामणिः । गण्डस्थले मृगमदामल पत्र भङ्गान स्वैरम्....,,

„ 8 लेखनी श्रीः । अद्यापि यस्य सुर किन्नर गीयमानाम् देव्यः शिलासु विजय स्तुतिमालिखन्ति ॥ धर्म्मेणोत्स्वमितम् मुदा । विहसितम् सलोक मर्यादया त्रया विस्फुरितम्...

„ 9 त्रिभिरजृमभितम् । यस्मिना स्वामिनि सर्वतः समुदये तेप्यार्थिनः साहसम् सान्द्रानन्दमयाः स्वदैन्यवैरहान नृत्यन्ति पूर्णाशयाः ॥ नौश्चेन्दु करो न चापि विगत ...

„ 10 तेनास्तम याति जलात्मभिः प्रतिहतो नान्यैरापूर्णो भवः । जिह्वाग्रेण विनागमः प्रति मुहूर्त्ताप्य स्थिरानग्रहीन्नैवासंग दिगम्बरैक निरतो यो विश्वरूपः... ... ॥...

11 मराधिपोपि चकितो ब्रह्मापि यद् विस्मितो देवो
विष्णुरपि स्फुतम् विहसितो रुद्रोपि रोमाञ्चितः।
उद्दाम प्रसरत प्रसन्न बहुले यत् कीर्ति कल्लोलिनी
गम्भीरामभसि मज्ज··· ···

,, 12 पि सम्बोधित ॥ यद्दुर्गमम् सरति दूरतरम् दुरापम्
यच्चेतसा । यम् लब्ध······त······आसात ।
सहस्र श्रमब्रीराहन चतुर्दस्यामाराभ्भवराम इति
चः स्फुटतामुपेताः ॥ अस्याम् भू······

,, 13 प्रा धर्म्मेण मर्यादया राज्य श्री भिरलकृताः पुनरमी
भोगैकदा·············श्री विश्वार्विधे (?) ब
कीर्तन कथा गीय·········

,, 14 ॥ कांति ···त्वामविश्मयकर······आपि सौर्य्याद्-
सौ······न्त। श्री रपि······नि······द्धि पुर्वदिशी
भवति किम् श्री विश्वरुपोद्धतरेखेव प्रतिप······

,, 15 यतते आद्भुता । अस्येव·········प्रतिपिताम स्य
महातीमस्थाप्य कीर्तिम······ततः साधित। उद्धृतार्थि
निसर्ग्ग धर्म्म निरतो यो···

,, 16 ········सिद्धिमनयत्रामेव कीर्तिम् पुनः॥ किम् ब्रमः
·· ·यस्यासाधु गुणस्य नास्ति महतः·· ···किन्न···· ···

,, 17 राशि· सुविश्रुतवयो येनाकास्तिक विस्मयेन
मुखरालोकः करतुरग्री··· ···निवशनः स्कुद्धारागारम्
विसृज···· ··

" 18 व्यामवर-संचार-तृप्ति वहु मनोज··· ·· । प्रशमनम्
सूराभाण्डम् जलदः ॥ ···· ···कनकेश्वर·········जलदः
श्री विश्वरुपावरो · ··· ·

" 19 तय सदाचरौ सुविदितः श्री सतकुला······सर्व्वसः
सतकुलाद्दतो अक्षयवटो देवो वटेशाव्यहः ॥
इत्याद्याह सुमनोनुरुप रचना रतना······

" 20 ········ज्ञाम् च यः । येनात्य अद्भुत विक्रमेण तरसा
श्रीमद्गयामण्डले आससारमुग्र धर्म्मविजय
स्तम्भैवारोपितः ॥ ते नै·······

" 21 —ज्ञ विशमम निहारावताराद्भुतम् ॥ कीर्तिस्वेत
गभस्तिइस्तरचिते इति राजताम् देवस्य प्रक्ता-
महस्य महति श्री········

" 22 ······—ति नामधेय । सत्वैव धनिनः किम्वा
वहुब्रुमहे । किम् त्वीहग यदि कीर्तनम् भगवतः
केनापि निष्पादित श्री विश्वावि ··· · ·

" 23 यः स्वत्वपमोक्ष (?) । —यावच्चन्द्रदिवाकरौ
सुरसरिद्धात्री नभोमण्डलम् । कर्तुम्कीर्तिकदम्व
(?) स विजयी श्री विश्वरुपाह्वये···· ···

" 24 गणितुमालंकरितो भगवान भर्तुर विग्रहपालदेव
नृपते राज्यश्रीयम् विभ्रतः । सम्प्राप्ते तरसैव
पञ्चगणिते रजस्य सम्वत्सरे······

" 25 विश्वादित्य गुणोत्क्षेप प्रीतिस्तिमित चेतसा······

